आकाशवाणी

संस्कृत वार्ता:

दिनाङ्क : 03.10.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- केन्द्रीय सहकारिता-मन्त्री-अमितशाह: उक्तवान् यत् सर्वकार: गोपालन-आधारितं-सम्पूर्ण-पारिस्थितक-तन्त्रं विकसयन् अस्ति येन ग्रामीण-अर्थव्यवस्थायै प्रोत्साहनं लभते।
- प्रधानमन्त्रिण: नरेन्द्र मोदिन: मासिक: आकाशवाणी-कार्यक्रम: 'मन-की-बात' अद्य द्वादश-वर्षाणि पूरितानि।
- दिल्ली-आरक्षिदलेन सूचितं यत् सार्वजनिक-सुरक्षां-विधि-व्यवस्थां, यातायात-सञ्चारं सुनिश्चेतुं नवदिल्लीमण्डले भारतीय-नागरिक-सुरक्षा-संहिता त्रयोविंशति-उत्तर- द्विसहस्रतमस्य त्रिषष्ट्युतरैकशत-तम:भाग: प्रभावीभूत:।
- आन्ध्रप्रदेशे सत्यावेडु-मण्डलस्य 'श्रीसिटी' इत्यत्र एकेन औद्योगिक-वाष्पयन्त्र-विस्फोटेन चत्वार: कर्मकरा: मृता:, एकश्च गम्भीररूपेण व्रणित:।
- अपि च,
- एशियाई क्रीडायां जापाने देशे भारतेन अद्य पञ्च-स्वर्णपदकानि, द्वे रजत पदके च विजिते।

<u>अमितशाह: भोपाल:</u>

केन्द्रीय गृह एवं सहकारिता मन्त्री अमितशाह: अवदत् यत् नरेन्द्रमोदी प्रशासनं गो-पालनस्य विषये सम्पूर्णं तन्त्रं विकसितुं प्रयतते। गोमयात् जैव गैस-जैविकखाद- निर्माणात् प्रारभ्य दुग्धजन्पदार्थानां प्रसंस्करणं तथा च तेषां विपणस्य व्यवस्था अपि अस्मिन्नेव तन्त्रे अन्तर्भवति। एतेन ग्रामीण-अर्थव्यवस्थाया: विकासे नूतनं प्रोत्साहनं प्राप्स्यते। अद्य भोपालनगरे आयोजिते राज्यस्तरीय-गौपालक-सम्मेलने भाषमाण: अमितशाह: अवदत् यत् सहकारिता-मन्त्रालयस्य स्थापनया पशुपालका: सर्वाधिकं लाभं प्राप्स्यन्ति।

आपराधिक-न्यायव्यवस्थाया: परिष्कार-विषये अमितशाह: भणितवान् यत् भारतीय-न्याय-संहितायाः पूर्णरूपेण कार्यान्वयने सति प्रथम-सूचना-प्रतिवेदनस्य पञ्जीकरणात् आरभ्य सर्वोच्च-न्यायालयपर्यन्तं प्रकरणानां निस्तारणं त्रि-वर्षाभ्यन्तरे कर्तुं शक्यते।

## मन की बात 12 वर्षपूर्ति:

प्रधानमन्त्रिण: नरेन्द्रमोदिन: मासिक-आकाशवाणी-कार्यक्रम: 'मन की बात' इति कार्यक्रम: अद्य द्वादशवर्षाणि प्रपूरितवान्। अस्य कार्यक्रमस्य प्रथमं प्रसारणं चतुर्दशोत्तर-द्विसहस्रतमे वर्षे विजयदशम्या: अवसरे प्रसारित: अभवत्। साम्प्रतं यावत् मन-की-बात कार्यक्रमस्य अष्टत्रिंशदुत्तरैकशत- संस्करणानि प्रसारितानि। विगतेषु द्वादश-वर्षेषु "मन-की-बात" कार्यक्रम-माध्यमेन समग्रदेशे जायमानं सकारात्मकं परिवर्तनं प्रकाशितुं, भारतस्य विकास-यात्रायां भारतीय-नागरिकाणां सक्रियांश- ग्रहणं प्रोत्साहयितुं च एकं विशिष्टं मञ्चं प्रदत्तवान्। अनेन मासिक-कार्यक्रमेण प्रधानमन्त्री देशस्य तेषां जनानां प्रेरणादायी: कथा: विनिमयं करोति, ये शिक्षा-स्वास्थ्य- पर्यावरणसंरक्षण-नवाचार-समाजसेवादिषु क्षेत्रेषु विशिष्टं योगदानं कुर्वन्ति।

## दिल्ली – बी.एन.एस.एस. त्रिषष्ट्यधिकैकशतम्

दिल्ली-आरक्षिदलम् अवदत् यत् जनसुरक्षां, लोकव्यवस्थां, निर्बाधं यातायातसञ्चारं च सुनिश्चितं कर्तुं नवदिल्लीमण्डले भारतीय-नागरिक-सुरक्षा-संहितायाः त्रि-षष्ट्यधिकैक-शततमा धारा प्रवर्तते। सार्वजनिकसूचनायां नवदिल्ल्याः आरक्षि-उपायुक्तः अवदत् यत् अनुमति-विहीनाः जनसम्मर्दाः, सार्वजनिकभाषणानि, उद्घोषकरणं, शोभायात्राः, प्रदर्शनानि,अन्याः निर्दिष्टाः गतिविधयः च निषिद्धाः सन्ति इति। सूचनायाम् इदम् अपि उक्तं यत् अद्य निर्धारिताय कस्मैचिदपि विरोधप्रदर्शनाय अनुमतिः न प्रदत्ता, अपि च तादृशस्य कस्यचित् विरोधप्रदर्शनस्य विषये नवदिल्लीमण्डलस्य आरक्षिदलेन काचित् पूर्वसूचना न प्राप्ता। दिल्ली-आरक्षिदलं नागरिकान् प्रार्थितवत् यत् ते आदेशस्य कठोरतया पालनं कुर्वन्तु, आरक्षिदलेन सह सहयोगं च कुर्वन्तु।

## आन्ध्रप्रदेशः – वाष्पयन्त्रविस्फोटः

आन्ध्रप्रदेशे अद्य सत्यावेडुमण्डलस्य श्रीसिटी-क्षेत्रे एकस्मिन् निज-औद्योगिककेन्द्रे वाष्पयन्त्रस्य विस्फोटे चत्वारः श्रमिकाः मृताः, अन्यः एकः च गभीररूपेण आहतः। अयं विस्फोटः विशेषार्थिक-क्षेत्रे स्थितस्य एकस्य उद्योगशालान्तरगतः अभवत्। द्वौ श्रमिकौ घटनास्थले एव मृतौ, अन्ये त्रयः च गभीररूपेण आहताः समीपस्थं चिकित्सालयं नीताः। आहतेषु द्वौ श्रमिकौ पश्चात् चिकित्साकाले मृतौ। अवशिष्टस्य श्रमिकस्य चिकित्सा गहनचिकित्साकक्षे प्रचलति। मुख्यमन्त्री एन. चन्द्रबाबू नायडू महोदयः अस्यां घटनायां अतिशय-दुखं प्रकटितवान्। सः वरिष्ठाधिकारिभिः सह सम्भाष्य तान् आवश्यकान् उपायान् कर्तुं शोकसन्तप्तेभ्यः परिवारेभ्यः सर्वविधं सम्भाव्यं साहाय्यं प्रदातुं च निर्दिष्टवान्।

## विदेशमन्त्रालयः – ओमान्-दूतावास

ओमान-देशे स्थितः भारतीयदूतावासः होर्मुज़-जलसन्धौ प्रक्षेप्यास्त्रेण आहते कुवैत-ध्वजाङ्किते 'एम. टी. काज़िमा-तृतीय' इति तैलवाहके जलयाने स्थितानां पञ्चानां भारतीयनागरिकाणां रक्षणकार्यस्य समन्वयम् अकरोत्। सामाजिकसंचारमाध्यमे प्रकाशिते सन्देशे दूतावासः अवदत् यत् सर्वे पञ्च भारतीयनागरिकाः सुरक्षिततया तटम् आनीताः। निरन्तरं सहयोगाय साहाय्याय च दूतावासः ओमान-देशस्य अधिकारिभ्यः धन्यवादान् अर्पितवान्। विदेशमन्त्रालयः अवदत् यत् विदेशेषु स्थितानां भारतीयनाविकानां सुरक्षायै, संरक्षणाय, कल्याणाय च दूतावासः प्रतिबद्धः अस्ति।

## हरिवंश-तंजानिया-प्रतिनिधिमण्डलयम्

राज्यसभाया: उपसभापते: हरिवंशस्य नेतृत्वे एकं भारतीय-संसदीय प्रतिनिधिमण्डलं-अन्तरसंसदीय संघस्य त्रि-पञ्चाशदुत्तरैकशत- तम्याम् सभायां तत्सम्बद्धोपवेशनेषु च भागं गृहीतुं तन्जानिया-देशं प्रति प्रस्थितवान्, एतानि उपवेशनानि मासस्य अस्य पञ्च तारिकात: नव दिनांक-पर्यन्तं आयोज्यन्ते। एतत् प्रतिनिधिमण्डलं समकालीन-वैश्विक-महत्वस्य विषयेषु

विविधासु सभासु, विचारगोष्ठीषु, कर्मशालासु च भागं गृहीष्यन्ति, एतेषु विषयेषु भारतस्य दृष्टिकोणं स्पष्टं वक्ष्यति। श्रीहरिवंश: शासी-परिषद:, सामान्य- वादविवादस्य-आपतकालीन-विषयक-वादविवादस्य तथा च संसदीय-संघस्य अध्यक्षपदस्य अभ्यर्थिनां श्रावणस्य च कार्यक्रमेषु भागं ग्रहीष्यति।

<u>एशियाई-क्रीडा – पदकतालिका</u>

जापानदेशे प्रचल्यमानेषु एशियाई-क्रीडासु अद्य भारतं पञ्च स्वर्णपदकानि, द्वे रजतपदके, द्वे कांस्यपदके च जितवत्। भारतीयं पुरुषाणां हॉकी-दलं मलेशियादेशं पराजित्य देशस्य कृते स्वर्णपदकं प्राप्तवत्। भारतीयं पुरुषाणां क्रिकेट-दलं पाकिस्तानं पराजित्य स्वर्णपदकं जितवत्। मल्लयुद्धे पुरुषाणां सप्तपञ्चाशत्-किलोग्राम्-भारवर्गे अमन सहरावत स्वर्णपदकं, सप्तनवति-किलोग्राम्-भारवर्गे दीपक पुनिया च कांस्यपदकं जितवान्। अन्तिम पंघाल महिलानां त्रिपञ्चाशत्-किलोग्राम-भारवर्गे रजतपदकं प्राप्तवती।

अपि च, गोल्फ-क्रीडायां प्रणवी शरत अर्स् महिलानां वैयक्तिकस्पर्धायां स्वर्णपदकं, दलस्पर्धायां च रजतपदकं प्राप्तवती। महिलानां रिकर्व-धनुर्विद्यायां कुमकुम मोहोड स्वर्णपदकं जितवती, नीरज चौहान च पुरुषाणां रिकर्व-स्पर्धायां कांस्यपदकं प्राप्तवान्।

पदकतालिकायां भारतम् एकविंशतिः स्वर्णपदकानि, सप्तविंशतिः रजतपदकानि, सप्तत्रिंशत् कांस्यपदकानि च इति आहत्य पञ्चाशीति-पदकैः सह चतुर्थे स्थाने वर्तते।

राष्ट्रपतिः द्रौपदी मुर्मू महोदया, प्रधानमन्त्री नरेन्द्रमोदी महोदयः, क्रीडामन्त्री मनसुख माण्डविया महोदयः च पदकविजेतॄन् अभिनन्दितवन्तः।

।। इति वार्ता: ।।